# Shri Rama Ashtakam

# શ્રીરામાષ્ટકમ્

## Document Information

Text title : Shri Rama Ashtakam

File name : rAmAShTakam7.itx

Category : raama, aShTaka

Location : doc_raama

Author : gAyatrisvarUpa brahmachari

Proofread by : Vani V

Description/comments : Author/publisher comment mentions the cost of the book as bhagavadbhakti

Latest update : January 7, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 30, 2022

*sanskritdocuments.org*

# શ્રીરામાષ્ટકમ્

॥ શ્રીગણેશાય નમઃ ॥

શ્રીરામં કરુણાનિધિં ચ પરમં પૂજ્યં મહદ્રૂપકં
    માયાતીતમજં ચ નિત્યવિમલં હ્યેકં જગદ્વ્યાપકમ્ ।
વાશિષ્ઠયાદિઋષીશ્વરૈઃ પ્રતિદિનં બ્રહ્મૈવ જાનન્તિ યં
    સત્યં શ્યામલસુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૧॥

રામં શ્યામલકોમલાઙ્ગસુતનું સીતાપતિં સુન્દરં
    રામં ભક્તપ્રિયશ્ચ ધાર્મિકરઘુવંશસ્ય સદ્ભૂષણમ્ ।
રામં નીતિપ્રિયં ચ બ્રાહ્મણપ્રિયં સત્યપ્રિયં ધાર્મિકં
    સત્યં શ્યામલ સુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૨॥

રામં કણ્ટકરાવણાન્તકરણં સીતાસુરક્ષાકરં
    રામં ભક્તવિભીષણાય સુખદં લઙ્કાપુરી દાયકમ્ ।
રામં લક્ષ્મણપૂર્વજઞ્ચ ભરતશત્રુઘ્નપૂજ્યં પરં
    સત્યં શ્યામલ સુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૩॥

કૌશલ્યા દશચક્રિ રાજતનયં રામાધનારાયણં
    નાનાવસ્ત્રવિભૂષણાદિસહિતં હસ્તે ધનુર્વાણકમ્ ।
કર્ણે કુણ્ડલહેમરત્નજટિતં રૂપં સદા રમ્યકં
    સત્યં શ્યામલ સુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૪॥

સર્વસ્મિન્જગતીતલે ચ ભુવને ત્વં પ્રાણિનાં પ્રાણદઃ
    સર્વાત્માસિ ચ જ્ઞાનિયોગિમુનિનાં ત્વં જ્ઞાનદો મોક્ષદઃ ।
ભક્તાનાં ચ સુરક્ષકં પ્રતિદિનં ચૈતન્યરૂપં પરં
    સત્યં શ્યામલ સુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૫॥

ત્વં સૂર્યોઽસિ યમેન્દ્રધર્મમરુતાં રૂપોઽસિ બ્રહ્માત્મકો
    રુદ્રવ્યાસશુકાત્મકશ્ચ વરુણશ્ચન્દ્રોઽસિ કૃષ્ણાત્મકઃ ।

ત્ર્યાત્માનમખણ્ડરૂપમનઘં સાઙ્ખ્યાદિવેદ્યં પ્રભું
સત્યં શ્યામલ સુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૬॥

કૈવલ્યાત્મક શાન્ત ! હે રઘુપતે સીતાપતે હે પ્રભો
બ્રહ્માનન્દસ્વરૂપ હે ગુણનિધે લક્ષ્મીપતે હે વિભો ।
હે વિશ્વમ્ભર સત્સ્વરૂપ ભગવન્ હે શુદ્ધબોધાત્મક
સત્યં શ્યામલસુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૭॥

હે ત્રૈલોક્યપતે ચરાચરગુરો હે વિશ્વસઞ્ચાલક
હે આદર્શચરિત્ર હે નરહરે બ્રહ્માણ્ડસંરક્ષક ।
સૌમિત્રી હનુમત્પ્રિયં પ્રતિદિનં સુગ્રીવમિત્રં પ્રભું
સત્યં શ્યામલસુન્દરઞ્ચ સુખદં શ્રીરામચન્દ્રં ભજે ॥ ૮॥

સમર્પયામિ હે રામ રામાષ્ટકસ્તવં પ્રભો ।
નમામિ ભગવન્ રામ પ્રસન્નો ભવ સર્વદા ॥ ૯॥

ઇતિ ગાયત્રીસ્વરૂપ બ્રહ્મચારીવિરચિતં શ્રીરામાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Vani V

*Shri Rama Ashtakam*
pdf was typeset on January 30, 2022

Please send corrections to *sanskrit@cheerful.com*